## महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु। (३८/३७७२)

प्रकृत्या पूर्वपदम् इति वर्तते, द्वन्द्वे इति निवृत्तम्। महान् इत्येतत्पूर्वपदं व्रीहि अपराह्ण गृष्टि इष्वास जाबाल भार भारत हैलिहिल रौरव प्रवृद्ध इत्येतेषु उत्तरपदेषु प्रकृतिस्वरं भवति। महाव्रीहिः। महापराह्णः। महागृष्टिः। महेष्वासः। महाजाबालः। महाभारः। महाभारतः। महाहैलिहिलः। महारौरवः। महाप्रवृद्धः। महच्छब्दोऽन्तोदात्तः, तस्य प्रतिपदोक्तो यः समासः 'सन्महत्परमोत्कृष्टाः पूज्यमानैः' (२.१.६१/७४०) इति [1]तत्रैष स्वरः। तेनैषां [2]षष्ठीसमासोऽन्तोदात्त एव भवति, महतो व्रीहिः महद्व्रीहिः इति। 'कर्मधारयेऽनिष्ठा' (६.२.४६/३७८०) इत्ययमपि श्रेण्यादिसमासे विधिः इति[3] प्रवृद्धशब्दः इह पठ्यते॥

## क्षुल्लकश्च वैश्वदेवे। (३९/३७७३)

क्षुल्लक इत्येतत् पूर्वपदं [4]महांश्च वैश्वदेवे उत्तरपदे प्रकृतिस्वरं भवति। क्षुल्लकवैश्वदेवम्। महावैश्वदेवम् क्षुधं लाति इति क्षुल्लः। तस्माद् अज्ञातादिषु प्रागिवात् केऽन्तोदात्तः क्षुल्लकशब्दः॥

## उष्ट्रः सादिवाम्योः। (४०/३७७४)

उष्ट्रशब्दः पूर्वपदं सादिवाम्योरुत्तरपदयोः प्रकृतिस्वरं भवति। उष्ट्रसादि। [5]उष्ट्रवामि। उष्ट्रशब्द उषेः ष्ट्रन् (उ.४.१६२) प्रत्ययान्तः आद्युदात्तः। कर्मधारयोऽयं षष्ठीसमासो वा॥

## गौः सादसादिसारथिषु। (४१/३७७५)

गोशब्दः पूर्वपदं साद सादि सारथि इत्येतेषु उत्तरपदेषु प्रकृतिस्वरं भवति। गोः सादः गोसादः। गां सादयति इति वा गोसादः। गोः सादिः गोसादिः। गोसारथिः॥

---

1. तत्रैव ङ. 2. षष्ठीसमासे क. 3. प्रतिप्रोक्तत्वात् इत्यधिकम् क. 4. चकारात् महान् च ह.
5. उष्ट्रवामि नास्ति ह.